International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 329-334
© 2021 IJSR
www.anantaajournal.com
Received: 19-07-2021
Accepted: 23-08-2021

**बीरेन्द्रदासः**
सहकारी-अध्यापकः
कृष्णचन्द्रमहाविद्यालयस्य
शोधछात्रः संस्कृतविभागस्य
रायगञ्जविश्वविद्यालयस्य,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**बीरेन्द्रदासः**
सहकारी-अध्यापकः
कृष्णचन्द्रमहाविद्यालयस्य
शोधछात्रः संस्कृतविभागस्य
रायगञ्जविश्वविद्यालयस्य,
पश्चिम बंगाल, भारत

# भविष्यपुराणानुसारं मोक्षदायकव्रतानां समीक्षणम्

**बीरेन्द्रदासः**

**शोधसारः**
वेदोपवृंहनशास्त्रं वेदव्याख्यानशास्त्रं वा पुराणशास्त्रं सुविस्तृतं गभीरतत्त्वान्वितं तथ्यसमृद्धञ्च। वैदिकऋषीनां मननात्मकमन्त्रानां तात्पर्यं भाष्योपभाष्यादिग्रन्थेषु वर्णितं सदपि समाजे अतिसाधारणजनानां कृते तस्य महनीयत्वं न हृदयवेद्यम् आसीत्। पुराणशास्त्रन्तु सहजतया अतिसारल्येन वेदव्याख्यानद्वारा सर्वेषां कृते चिन्तावर्धकं नानाशास्त्रीयगुणान्वितञ्च। संस्कृतशास्त्रे धर्मशास्त्ररूपेणापि पुराणशास्त्रस्य प्रसिद्धिरस्ति। महापुराणमुपपुराणाभ्यां मुख्यतया पुराणशास्त्रस्य द्वैविध्यं स्वीकृतम्। अष्टादशमहापुराणेषु भविष्यपुराणमन्यतमम्। अस्य महापुराणस्य प्राचीनत्त्वविषये संशयोऽस्ति, केचन तस्य अर्वाचीनत्वमपि स्वीकूर्वन्ति। अस्य महतः शास्त्रस्य वक्ता सर्वशास्त्रज्ञः सुमन्तुः श्रोता च अजमीरनन्दनः तेजस्वी राजा शातनीकः। आत्मनः सुखार्थं कृष्णद्वैपायनः व्यासदेवः धर्म-वेदस्मृति-शास्त्रोपजीवकं भविष्यपुराणशास्त्रं व्यरचयत्। कलियुगे अल्पायुषां विद्याहीनानां मनुष्याणां सुखावहार्थम् अस्य महापुराणस्य सृष्टिः। भविष्यपुराणे दान-उपचार-उपासना व्रतानुष्ठानादि बहुविधसाधनानामालोचनास्ति। एतेषु साधनमार्गेषु व्रतानुष्ठानमन्यतमसाधनम्। व्रियते इति वृञ् वरणे बाहुलकादतच् स च कित् इत्यनया व्युत्पत्त्या निष्पद्यते व्रतशब्दः। अथवा वृ धातोः क्त प्रत्ययेन निष्पन्नः व्रतशब्दः। अर्थात् उपवासादिभिः यैः कर्मानुष्ठानैः पूर्णकर्मानुष्ठानं व्रतनाम्नाभिधीयते। ईष्टलाभार्थम् अनुष्ठेयविशिष्ठधर्माचारं व्रतम्। साधारणतः गृहस्थानां साफल्यकामनार्थं सामाजिकजीवने व्रतपालनस्य विधानं दीयते। यद्यपि पौराणिकयुगे देवानां तुष्टिविधानार्थं हि व्रतपालनस्य मुख्यं उद्देश्यं तथापि ततो प्रागेच व्रतानुष्ठानस्य प्रचलनमासीत्। किन्तु पौराणिकयुगे एव आचारादिसम्बन्धितं व्रतानुष्ठानं शास्त्रीयानुमोदनं लभते। व्रतविषयकं शोधपत्रेऽस्मिन् भविष्यपुराणानुसारं संक्षेपेणाऽत्रालोचनं वर्तते।

**मुख्यशब्दाः-** पुराणम्, भविष्यपुराणम्, व्रतम्, धर्मः, मोक्षः, उपासनम्।

## प्रस्तावना

पुराणं प्राचीनघटनाश्रितं सदपि नवनवतत्त्वपरिवेशकम्। तदुच्यते- 'पुरा नवं भवति' अर्थात् प्राचीनविषयाश्रितं सदपि पुराणं सर्वदा नूतनतत्त्वपरिवेशकम्। पूर्वे पुराणशब्देन प्राचीन-आख्यायिकादिसम्बलितं ग्रन्थविशेषं बोध्यते। तदुच्यते पुराणमाख्यानम्। पुराणशब्दस्तु विशेषणसंज्ञा इति द्विविधार्थे प्रयुज्यते। तस्य विशेषणरूपग्रहणेन पुरातन-प्राचीन-इत्यादीनाम् अर्थानां बोधः स्यात्। तथा संज्ञारूपग्रहणेन आख्यान-उपाख्यानादिसमन्वितस्य ग्रन्थस्य बोधः जायते। अस्मिन् अर्थे पुराणशब्दस्य प्रयोगः अथर्ववेदे ब्राह्मणग्रन्थे च प्राप्तः। पुराणशब्दस्य व्युत्पत्तिप्रसङ्गे बहुमतं प्राप्तम्। यथा- वायुपुराणस्य मतानुसारं- 'पुरा अनति' अर्थात् प्राचीनकाले यत् आसीत् तत् पुराणम्। पद्मपुराणानुसारं- पुरा परम्परां वेष्टि कामयते अर्थात् यत् परम्परां कामयते तत् पुराणम्।

अतः वयं सर्वे सहजसरलभाषया वक्तुम् शक्नुमः यः ग्रन्थः पुरातनाख्यानं प्रस्तुतं करोति तत् पुराणम्। इति बहुविधत्वेन पुराणशब्दस्य निर्वचनमस्ति। पुराणवेत्तारः पुराणशब्दस्य पञ्चलक्षणानां दशलक्षणानां वा स्वीकृतवन्तः। महापुराणमुपपुराणाभ्यां मुख्यतया पुराणशास्त्रस्य द्वैविध्यं स्वीकृतम्। अष्टादशमहापुराणेषु भविष्यपुराणमन्यतमम्। अस्य महापुराणस्य प्राचीनत्त्वविषये संशयोऽस्ति, केचन तस्य अर्वाचीनत्वमपि स्वीकूर्वन्ति। अस्य महतः शास्त्रस्य वक्ता सर्वशास्त्रज्ञः सुमन्तुः श्रोता च अजमीरनन्दनः तेजस्वी राजा शातनीकः। आत्मनः सुखार्थं कृष्णद्वैपायनः व्यासदेवः धर्म-वेदस्मृति-शास्त्रोपजीवकं भविष्यपुराणशास्त्रं व्यरचयत्। कलियुगे अल्पायुषां विद्याहीनानां मनुष्याणां सुखावहार्थम् अस्य महापुराणस्य सृष्टिः। तदुच्यते भविष्यपुराणशास्त्रे- 'अल्पायुषो लोकजनान्समीक्ष्य विद्याविहीनान्पशुवत्सुचेष्टान् तेषां सुखार्थं प्रतिबोधनाय व्यासः पुराणं प्रथितं चकार'।।[1]

भविष्यपुराणस्य नामकरणविषये संशयो जायते। भविष्यपुराणमिति शब्दे भविष्यपदस्य भविष्यकालरूपार्थः तथा पुराणपदस्य इतिवृत्तम् इत्यर्थः प्रसिद्धः। भविष्यपुराणस्य वाचकार्थः भवति भविष्यकालस्य इतिवृत्तमिति। अतो उभयोर्थयोः भिन्नतावशात् भविष्यपुराणमिति नामकरणं कथं सम्भवेत् इति पूर्वपक्षीयानां मतमस्ति। भविष्यपुराणमिति नामकरणेन तस्य शास्त्रमाहात्म्यं यथा प्रकटितं तथा परमेश्वरस्य त्रिकालव्यपकत्वमपि। काल एव सर्वेषामाधारः, किन्तु परमेश्वरः कालाधरः। परमेश्वरोऽतीतादिकालानां प्रतिनियतम् आवर्तनं भवति। अनादिकालात् निरन्तरं सृष्टिप्रवाहः प्रवर्तितः। तस्मिन् कालप्रवाहे अनागतवस्तुनि अपि भूतकालं प्रति विलीयन्ते। अर्थात् भविष्यकालमाश्रित्य वर्णितविषयः क्षणादेव प्राचीन-पुरातनपुराणादिअतीतकालधारायां परिवर्तिताः भवन्ति। अर्थात् भविष्यपुराणरूपवर्तमानकालाश्रये अतीतविषयानां प्रतिविम्वं यथास्ति तथैव अनागतविषयामपि आभासः। अर्थात् भविष्यपुराणं खलु वर्तमानकालस्य आधारभूतम्। तत्र विगतभावानाम् अनागतभावानामपि संमिश्रणहेतोः अस्य महापुराणस्य नामकरणं यथोपयुक्तं तथा शास्त्रसम्मतम्।

भविष्यपुराणे ब्राह्म-मध्यम-प्रतिसर्ग-तथोत्तर-पर्वाणि षटविंशतिसहस्रश्लोकाः पञ्चाधिकषट्शताध्यायाः प्राप्यन्ते। भारतवर्षस्य विभिन्नेभ्यः प्रान्तेभ्यः अस्य पुराणस्य संस्करणानि प्रकाशितानि। यथा- 1957 ईशीयवर्षे वोम्वाइ इति स्थानतः क्षेमराजश्रीकृष्णदाससम्पादितं भविष्यपुराणम्, 1978 ईशीयवर्षे वरेली इति स्थानतः श्रीरामशर्माचार्यानूदितं भविष्यपुराणम्, 1997 ईशीयवर्षे प्रयागस्थः हिन्दि-साहित्यसम्मेलनात् पण्डित-वावुराम-उपाध्यायानूदितं भविष्यपुराणम्, 2013 ईशीयवर्षे कलिकातास्थः नवभारत इति प्रकाशनात् स्वामीपरमात्मनन्दनाथ भैरवसम्पादितम् अनूदितं च भविष्यपुराणम्, तथा एस.एन.खण्डेलवाल-अनूदितं चौखम्वासंस्कृतप्रतिष्ठानतः प्रकाशितं भविष्यपुराणम् अन्यतमम्। चौखम्वासंस्कृतप्रतिष्ठानतः प्रकाशितं प्रथमसंस्करणमाधारीकृत्य अस्य गवेषणाप्रवन्धस्य आलोचनम्।

पाठकानां शास्त्रपाठे चिरन्तनप्रवृत्तिः अनुबन्धचतुष्टय सापेक्षा अधिकारी-विषय-सम्बन्धप्रयोजनमिति शास्त्रसिद्धमनुबन्धचतुष्टयम्। अनुबन्धचतुष्टयस्य ज्ञानमृते शास्त्रपाठे प्रवृत्तिर्न स्यात्। अनुबन्धचतुष्टयेषु तत्त्वज्ञानेच्छु तथा फलाधिकारी खलु अधिकारी। तदुच्यते- 'अधिकारी फले स्वाम्यमाधिकारी च तत्प्रभुः'[2] शास्त्रे आलोचितं वस्तु खलु विषयः, शास्त्रप्रतिपाद्यविषय- ग्रन्थयोर्मध्ये प्रतिपाद्य-प्रतिपादकभावः सम्बन्धः, तथा शास्त्रपाठस्य फलं प्रयोजनम्। शास्त्रपाठस्य फलं प्रयोजनं वा यथायथं ज्ञात्वा एव पाठकस्य शास्त्रपाठे प्रवृत्तिर्जायते। यथोच्यते शास्त्रे- 'प्रयोजनमनुदिश्य न मन्दोऽपि प्रवर्तते'।

संस्कृतसाहित्ये वामनादयः आलंकारिकाः पुरुषार्थानाम् आलोचनया काव्यफलं यथायथं व्याख्यातम्। धर्म-अर्थ-काम-मोक्षः-इति चतुर्वर्गः। चतुर्वर्गेषु मोक्ष एव परमपुरुषार्थः। विभिन्नेषु शास्त्रेषु परमपुरुषार्थविषये बहुविधालोचना दृश्यते। भविष्यपुराणशास्त्रेऽपि धर्मार्थकाममोक्षाणां परिगणनास्ति। किन्तु ग्रन्थस्य तात्पर्यं मोक्षरूपप्रयोजने फले वा वर्त्तते। प्रतिसर्गपर्वणि धृतशर्मणः उक्त्यां मोक्षविषये आलोचनास्ति- "देहि मे भगवन्मोक्षं सज्ञाकान्त नमो नमः"।[3]

मोक्षस्य स्वरूपं कीदृशम् ? केन मार्गेन साधनेन वा मोक्षः प्राप्यते इत्यादयो भविष्युपराणे दृश्यन्ते। मोक्षलाभेन साधकानामज्ञानं यथा दूरीभवति तद्वत् मुण्डकोपनिषदि निर्देशितमस्तिभिद्यते-

> "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः
> क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"।।[4]

सालोक्य-सामीप्य-सारुप्य-सायुज्यभेदैः भविष्यपुराणोक्तः मोक्षश्चतुर्विधः। मोक्षः खलु साध्यं तद् साधनन्तु बहुविधम्।

---

[1] भविष्यमहापुराणम् व्राह्मपर्व -1/8

[2] काव्यादर्शः, भूमिका-13

[3] भविष्यमहापुराणम्, प्रतिसर्गपर्व भागः-4, 7/24

[4] मुण्डकोपनिषद्- 2/2/4

भविष्यपुराणे दान-उपचार-उपासना व्रतानुष्ठानादि बहुविधसाधनानामालोचनास्ति। एतेषु साधनमार्गेषु व्रतानुष्ठानमन्यतमसाधनम्। व्रियते इति वृञ् वरणे वाहुलकादतच् स च कित् इत्यनया व्युत्पत्त्या निष्पद्यते व्रतशब्दः। अथवा वृ धातोः क्त प्रत्ययेन निष्पन्नः व्रतशब्दः। अर्थात् उपवासादिभिः यैः कर्मानुष्ठानैः पूरणं कर्मानुष्ठानं व्रतनाम्नाभिधीयते। ईष्टलाभार्थम् अनुष्ठेयविशिष्ठधर्माचारं व्रतम्। अतः कामनामूलकम्। परन्तु व्रतोपासना धर्माचरणस्य महत्वपूर्णाङ्गरूपेण विवेचितं तथा शुद्धिकरणाय व्रतोपासनायाः प्राधान्यमस्ति। व्रतपालनेन बुद्धेः, विचारस्य तथा सम्भवेत्। व्रतोपासकस्य हृदि पराभक्तिः, श्रद्धा सहजेनैव सञ्जायते। शरीरस्य रोगसमुदयानां तथा कायिक-वाचिक-मानसिक-सांसर्गिकपापानाम् उपपापानां महापापानां व्रतोपवासपालनेन उन्मूलनं स्यात्। एतत् खलु प्रामाणिकम्। व्रतपालनस्य प्राक् पापकारीजनस्य मुखावयवः निस्तेजः इव प्रतीयते। किन्तु तद् समाप्तेः परं तस्य मुखमण्डलं सूर्योदयकाले पद्मवद् अतिशयं प्रकाशते। अग्निपुराणस्य मतानुसारं शास्त्रोक्तनियमः व्रतम् इति। व्रतपालनकाले व्रतोपासकस्य सन्तापं सहनीयत्वञ्च वर्त्तते। तस्मात् व्रतोपासना तपस्या नाम्ना अभिहिता। इन्द्रियनिग्रहः दमनाम्ना मननिग्रहश्च शम नाम्ना अभिधीयते। व्रतपालनकाले इन्द्रियानां संयम अवश्यकर्तव्यः। तस्मात् व्रतस्य नियमः नामेति अपरा प्रसिद्धिः। अग्निपुराणे कथितमस्ति-

“शास्त्रोदितो हि नियमो व्रतं तच्च तपो मतम्
नियमास्तु विशेषास्तु व्रतस्यैव दमादयः
व्रतं हि कर्तृसंतापात्तप इत्यभिधीयते
इन्द्रियग्रामनियम नियमाश्चाभिधीयते”।।[5]

प्रवृत्तिरूपं निवृत्तिरूपं च द्विविधं व्रतानुष्ठानम्। द्रव्यविशेषभोजनद्वारा तथा पूजादिपालनद्वारा साधितं व्रतं प्रवृत्तिव्रतम्। निवृत्तिरूपं व्रतम् उपवासादिभिः साधितम्। उपवासप्रसङ्गे भविष्यपुराणे कथितम्- ‘उपवासः स विज्ञेयः सर्वभोगविवर्जितः’। अर्थात् सर्वभोगरहितं भूत्वा उत्तमगुणयुक्तरूपेण कालयापनम् उपवासः कथ्यते। प्रवृत्तिरूपव्रतं खलु उपासकस्य विविधकामनापूरकं भवति। तस्मात् प्रवृत्तिरूपव्रतं सकामव्रतनाम्नापि अभिधीयते। निवृत्तिरूपव्रतं तु विषयवासनारहितम्। अतः एतत् खलु निष्कामरूपेण स्वीकृतम्। निवृत्तिरूपं व्रतं पुनः नित्य-नैमित्तिक-काम्यभेदैः त्रिविधम्। अकरणे प्रत्यवायसाधनरूपं व्रतं नित्यव्रतम्। नित्यव्रतस्य अपालनेन पापं स्यात्। एकादशी प्रभृतीनि नित्यव्रतस्य उदाहरणानि। निमित्तमाश्रित्य अनुष्ठितं व्रतानुष्ठानं नैमित्तिकव्रतनाम्नाभिधीयते। यथा- चान्द्रायनादिव्रतम्। तथा च तिथिविशेषे काम्यमानं पालनीयव्रतविशेषं काम्यव्रतम्। यथा- सावित्रीव्रतम्। अस्य व्रतस्य कायिकमानसिकभेदद्वयमस्ति। अहिंसा-सत्य-आस्तेय-ब्रह्मचर्य-अकल्मष- इत्यादीनि मानसव्रतानि। सत्यादि अनुष्ठानेन मानसव्रतस्य फलं लभते। कायिकव्रतं खलु दिवारात्रम् उपवासयापनेन अनुष्ठीयते। मानसिकव्रतं निरन्तरम् ईश्वरनामस्मरणेन सम्पद्यते। हेमाद्रिव्रतग्रन्थे एतत् कथितमस्ति- “व्रतञ्च सम्यक् सङ्कल्पजनितानुष्ठेरक्रियाविशेषरूपं तच्च प्रवृत्ति निवृत्त्युभयरूपम्। तत्र द्रव्यविशेषभोजनपूजादिकं प्रवृत्तिरूपं उपवासादिकञ्च निवृत्तिरूपम्, तच्च नित्यं नैमित्तिकं काम्यञ्च। नित्यमेकादृश्यादि व्रतम्, नैमित्तिकं चान्द्रायणादिव्रतं काम्यं तत्तत्तिथ्युपवासादिरूपम्। सुरेशचन्द्र व्यानार्जीमहोदयेन पौराणिकव्रतानुष्ठानस्य भक्तिमूलकप्रायश्चित्यमूलक- कामनामूलकभेदानाम् उल्लेखः क्रियते। व्रताचारैः सह विधिविशेषः खलु उपवासः। व्रतविशेषे उपवासकालस्य न्यूनाधिक्यम् भवति। व्रतानुष्ठानेन सह पालनीय अपरविधिविशेषः खलु यज्ञः। कतिपयेषु व्रतेषु वैष्णवयज्ञ-ब्रह्मयज्ञादिनां निर्देशः क्रियते। व्रताचारस्य अपरविधिः मानसिकं तथा दैहिकशुद्धिकरणम्। व्रतानुष्ठाने सङ्कल्पस्यापि गुरुत्वमस्ति। व्रतपालने समयविशेषस्य तिथिविशेषस्य च आवश्यकता अस्ति। ब्रह्मलोकप्राप्तिदायकानां तथा मोक्षप्राप्तिदायकानां व्रतानाम् आलोचना क्रियते-

**तिलकव्रतम्-** चैत्रमासस्य शुक्लपक्षे प्रतिपदतिथौ तिलकव्रतम् अनुष्ठितम्। स्त्रियः पुरुषाः वा स्नात्वा देवान् पितृपुरुषान् च पूजयन्ति। अनन्तरं फलपुष्पमोदकादिभिः नैवेद्यं समर्प्य कृताञ्जलिपूर्वकं प्रार्थयन्ति-“भगवंस्त्वत्प्रसादेन वर्षं शुभमस्तु मे”।[6] ततः ब्राह्मणेभ्यः दक्षिणां प्रदद्यात्। ततः ललाटपट्टे चन्दनतिलकं अनुलेपन्ति। सदाचारेण सह अनेन व्रतपालनेन तिलकव्रतानुष्ठाता दुःखसमुदयात् मुक्तः सन् चिरकालं सुखं भुङ्क्ते, मृत्योरनन्तरं च ब्रह्मलोकं प्राप्नोति पुराणकारस्य अभिमतम्- “इत्थं समाचरति यः स सुखं विहृत्य मर्त्यः प्रयाति पदमापदि पद्मयोनेः”।[7]

---

[5] अग्निपुराणम्- 1/7/5/2-3

[6] भविष्यमहापुराणम्, उत्तरपर्व- 8/10

[7] तदेव -8/25

**करवीरव्रतम्-** भविष्यपराणस्य उत्तरपर्वणः दशमध्याये करवीरव्रतस्य विधिः वर्ण्यते। ज्यैष्ठमासस्य शुक्लपक्षे प्रतिपदतिथौ सूर्योदयकाले रक्तवस्त्रं परिहित्वा गन्धपुष्पधूपदीपसप्तधान्यैः नारिकेलडालिम्बादिफलैः लड्डुकादिमिष्टान्नैः च पतिव्रतया स्त्रिया करवीरव्रतस्य अनुष्ठानं क्रियते। इदं व्रतं केवलं नारीणां पालनीयम्। भक्तिपूर्वकं व्रतपालनकारिनी नारी संसारे अशेषसुखं अनुभूयते, मृत्योरनन्तरं सूर्योलोकं च प्राप्नोति। भविष्यपुराणे उक्तम्- "सम्पूज्य रत्नकुसुमाञ्चितसर्वशाखं नीलैर्दलैस्ततनुं करवीरवृक्षम्। भुक्त्वा मनोऽभिलषितान्भुवि भव्यभोगानन्ते प्रयाति भवनं भरताग्र्य भानोः।"[8]

**मेघपालीव्रतम्-** आश्विनमासस्य कृष्णपक्षे तृतीयातिथौ इदं मेघपालीव्रतमनुष्ठीयते। श्रद्धाभक्तिसहयोगेन स्त्रियः पुरुषाः मेघपालीव्रतं पालयन्ति। इदं व्रतं खलु पापहारकम्। प्रभूतधनलाभार्थं वणिजः कदापि वा मृषा वदन्ति, तस्मात् ते पापिनः भवन्ति। मृषावाक्यकथनात् पापिनः वणिजः पापविमोचनार्थं मेघपालीव्रतं सानुष्ठानेन सम्पादयन्ति। भविष्यपुराणे अस्य व्रतस्य माहात्म्यविषये कथितमस्ति- "पापं सत्यानृतं कृत्वा द्रव्यलुब्धाः फलान्वित अर्घ दत्वा मेघपाल्यै नाशयन्ति क्षणादिह"।।[9] तथा च अनेन व्रतपालनेन स्त्रियः पुरुषाः वा परमां श्रियां प्राप्तुमर्हन्ति- "नारी वा पुरुषव्याघ्र प्राप्नोति परमां श्रियम्"।[10] अनन्तरं स साधकः विष्णुलोके स्थातुं शक्नोति। "विष्णुलोकमवाप्नोति देहान्ते यानसंस्थितः कुलानि सप्त नयति स्वर्गं स्वानि रसातलम्"।[11]

**सौभाग्याष्टकतृतीयाव्रतम्-** चैत्रमासस्य शुक्लपक्षे तृतीयातिथौ सौभाग्याष्टकतृतीयाव्रतमनुष्ठीयते। अस्मिन् व्रते ललिताशङ्करयोः नैवेद्यगन्धपुष्पधूपदीपैः पूजनं क्रियते। अस्मिन् व्रते गोशृङ्गोदकं पीत्वा भूमौ उपरि शयनं कुर्यात्। अनेन व्रतपालनेन व्रतपालनकारी स्वर्गलोकं प्राप्यते- "सोऽपि विद्याधरो भूत्वा स्वर्गलोकं चिरं वसत्"।[12]

**अङ्गारकचतुर्थीव्रतम्-** भविष्यपुराणस्य उत्तरपर्वणः एकत्रिंशाध्याये अङ्गारकचतुर्थीव्रतोपासनायाः वर्णनास्ति। अस्मिन् व्रते चतुर्थीतिथौ अङ्गारकस्य पूजनं क्रियते। अनेन व्रतेन स्वर्गलाभोऽपि सम्भवेत्। अस्मिन् पुराणे उक्तम्- "रमित्वा सुचिरं कालं पुनः स्वर्गगतिं लभेत्"।[13]

**विशोकषष्ठीव्रतम्-** माघमासस्य शुक्लपक्षेपञ्चमीतिथौ विशोकषष्ठीव्रतमनुष्ठीयते। अस्मिन् व्रते कृष्णातिलैः स्नात्वा रक्तचन्दनरक्तकरवीररक्तवस्त्रधूपदीपनैवेद्यैः भगवतः सूर्य-नारायणस्य अर्चना क्रियते। पूजानन्तरं ब्राह्मणेभ्यः भोजनवस्त्रसुवर्णादीनि प्रदद्यात्। यः कामनारहितः सन् इदं व्रतं सम्पूर्णरूपेण पालयति सः एव परमपुरुषं लब्धुम् शक्यते। भविष्यपुराणमते- "निष्कामं कुरुते यस्तु स परं ब्रह्म गच्छति"।[14]

**कुक्कटमर्कटीव्रतम्-** अस्य पुराणस्य उत्तरपर्वणः षटचत्वारिंशाध्याये कुक्कटमर्कटीव्रतं वर्णितमस्ति। भाद्रमासस्य शुक्लपक्षे सप्तमीतिथौ इदं व्रतम् अनुष्ठीयते। अस्मिन् व्रते शिवपार्वत्योः पूजनं क्रियते। इदं व्रतं पालयित्वा ईश्वरी नाम साध्वीराणी मोक्षं लब्धवती- "वभूव सुप्रजाः साध्वी मोक्षं प्राप सुरेश्वरी"।[15]

**यमदर्शनत्रयोदशीव्रतम्-** मार्गशीर्षमासस्य शुक्लपक्षे त्रयोदश्यां रविवासरे मङ्गलवासरे चेति दिवसद्वयं परिवर्ण्य अन्येषु दिवसेषु धर्मराजं यमं पूजयेत्। अतः ब्राह्मणेभ्यः दानं प्रयच्छेत्। अस्य व्रतपालनस्य फलं अतीव सुखदायकम्। यः पुरुषः जीवने सकृत् इदं व्रतं पालयति सः कदापि मरणोत्तरं यमपुरीं न गच्छति। भविष्यपुराणे उक्तम्- "एवं यः पुरुषः कश्चित्सकृव्रतमिदं चरेत् स मृतोऽपि नरो मर्यो नायाति मम मन्दिरम्"।।[16]

**शिवचतुर्दशीव्रतम्-** भविष्यपुराणस्य उत्तरपर्वणि सप्तनवतितमोध्याये त्रिषु लोकेषु विख्यातस्य शिवचतुर्दशीव्रतस्य आलोचना दृश्यते- "त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्दशी"।[17] अनेन व्रतपालनेन व्रती सहस्राश्वमेधयज्ञस्य समं फलं प्राप्नोति- "सोऽश्वमेधसहस्रस्य फलं प्राप्नोति मानवः"।[18] या स्त्री भक्त्या सह इदं व्रतपालनं

---

[8] तदेव -10/09

[9] तदेव - 17/6

[10] तदेव - 17/12

[11] तदेव - 17/13

[12] तदेव - 25/42

[13] तदेव - 31/61

[14] तदेव - 38/15

[15] तदेव - 41/38

[16] तदेव- 89/38

[17] तदेव - 97/1

[18] तदेव - 97/28

करोति सापि पिनाकपाणिपरमेश्वरस्य परमं पदं लभते। "सापि प्रसादात्परमेश्वरस्य परं पदं याति पिनाकपानेः।"[19]

**आग्नेयीचतुर्दशीव्रतम्-** आग्नेयीचतुर्दशीव्रते चतुर्दशीतिथौ भगवतः शङ्करस्य पूजनं क्रियते। अस्य व्रतस्य अन्ते तीर्थस्य शरणं भवेत्-

"संवत्सरं समाप्तं हि व्रतस्य तु यदा भवेत्
काले गते बहुतिर्थे तीर्थस्य शरणं भवेत्"।।[20]

उपवासेन तथा ब्राह्मणेभ्यः भोजनदानेन मौनाचरणेन च व्रतपालनकारी शिवलोकं प्राप्तुं समर्थः स्यात्।

**सत्यनारायणव्रतम्-** भारतवर्षस्य अत्यन्तं जनप्रियं व्रतम् सत्यनारायणव्रतम्। भविष्यपुराणस्य प्रतिसर्गपर्वणः द्वितीयभागस्य चतुर्विंशोऽध्यायपर्यन्तं षड़ाध्याये सत्यनारायणव्रतोपासनाविधिः वर्ण्यते। इयं व्रतकथा स्कन्दपुराणे अपि प्राप्यते। भागवते कथितमस्ति- "सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये। सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः"।[21] अर्थात् श्रीसत्यव्रतस्य अथवा सत्यनारायणव्रतस्य तात्पर्यं शुद्धसच्चिदानन्दपरमात्मनि अनुभूयते। सत्यनारायणव्रतपालनस्य फलं इहजन्मे प्राप्नोति मानवः। भविष्यपुराणे उक्तम्- "सत्यनारायणव्रतमिह सर्वान्कामान्ददाति हि।"[22] अनेन व्रतपालनेन त्रैविध्यं दुःखं दूरीभवति। इदं व्रतं धनधान्यवर्धकम्, सर्वत्र विजयदायकम्। न केवलं इहलोके फलं प्राप्यते परलोके अपि व्रतपालनस्य फलं प्राप्यते। यथा राजा चन्द्रचूड़ः प्रत्येकमासस्य पूर्णिमातिथौ भक्तिसहयोगेन इदं व्रतं पालयित्वा परमं फलं लब्धुं समर्थोऽभवत्। सः विष्णुलोकं प्राप्तवान्। भविष्यपुराणे उक्तम्-

"तद्व्रतस्य प्रभावेन लक्षग्रामाधिपोऽभवत्।
राज्यं कृत्वा स षष्ठ्यब्दमन्ते विष्णुपुरं ययौ"।।[23]

**स्नपनसप्तमीव्रतम्-** शुक्लपक्षे सप्तम्यां तिथौ सूर्यदेवं भगवन्तं शङ्करं च स्नपनसप्तमीव्रतेन पूज्यते। अनेन व्रतपालनेन मोक्षलाभो भवति।

**मधूकतृतीयाव्रतम्-** फाल्गुनमासस्य तृतीयातिथौ पालनीयम् अपरं व्रतम् मधूकतृतीयाव्रतम्। अस्मिन् अनुष्ठाने उपवासं कृत्वा प्रातः स्नानं समाप्य गोधारथगतां रुद्रदेवस्य ध्यानमग्नदेवीं पार्वतीं गन्धकुसुमदीपैः पूजयेत्। अनेन व्रतपालनेन व्रतोपासकः रुद्रलोकं प्राप्यते तथा परमशान्तिं लभते- "एतद्व्रतं मयाख्यातं यास्यन्ति शाश्वतीः समाः"।[24] न केवलं भविष्यपुराणे अपि च पद्मपुराणे अग्निपुराणे शिवपुराणे स्कन्दपुराणे च व्रतपालनस्य विधिः व्रतपालनस्य बहुविधं फलं सविस्तरं वर्णितमस्ति। भविष्यपुराणे वर्णितानि व्रतानुष्टानानि मूलतः कामनापूरकानि सकामव्रतानि इति मन्ये।

**उपसंहारः-** प्राचीनकाले मनुष्याणां जीवने बहुविधप्राकृतिकविपर्ययानाम् आविर्भावः स्यात्। तेन दुःखानुविद्धाः मनुष्याः दुःखविमोचनार्थं निरन्तरम् ईश्वर-नाम-स्मरणपूर्वकं कालमतिवाहिताः ईश्वरचिन्तनक्रियाविशेषात् मनुष्यानामन्तरे व्रतपालनस्य विधिः संज्ञाता। व्रतपालनस्य बहुविधमुद्देश्यं परिलक्ष्यते। यथा व्रतपालनेन व्रतोपासकस्य इन्द्रियसंयमः सम्भवेत्। तथा देवताविशेषस्य पूजोपासनादि क्रियानुष्ठानैः तस्य देवस्य माहात्म्यमपि समाजे अधिकप्रचलितं भवति। तथा च व्रतपालनेन मनुष्याणां मानसिककामनायाः परिपूरणमपि सम्भवेत्। व्रतपालनेन इहलौकिक-पारलौकिक-उभयविधं फलमपि प्राप्यते। व्रतपालनकाले उपासकः निरन्तरं ईश्वर-चिन्तनेन तद्वत् भवितुमर्हति। तेन स सूर्यादि लोकेषु अपि स्थातुं समर्थः भवति। तस्याम् अवस्थायाम् उपासकः सदा परमानन्दम् अनुभूयते। तस्य सांसारिकसुखदुःखादिनामपि विनष्टं भवति। व्रतपालनेन साधकस्य मानसिकस्थितिर्जायते। शारिरीकवृत्तिरपि सम्यक् भवति। भविष्यपुराणसाहित्यमाध्यमेन व्रताचाराः आध्यात्मिक-वस्तुजगतयोर्मध्ये मेलबन्धनं क्रियते। साधारणतः गृहस्थानां साफल्यकामनार्थं सामाजिकजीवने व्रतपालनस्य विधानं दीयते। यद्यपि पौराणिकयुगे देवानां तुष्टिविधानार्थं हि व्रतपालनस्य मुख्यं उद्देश्यं तथापि ततो प्रागेव व्रतानुष्ठानस्य प्रचलनमासीत्। किन्तु पौराणिकयुगे एव आचारादिसम्बन्धितं व्रतानुष्ठानं शास्त्रीयानुमोदनं लभते। तथा च व्यवहारिकजगति धर्माचाररूपेण प्रतिष्ठितम्। व्रतानुष्ठानैः सह अवैदिक-आचाराणामपि संस्कृतायनं जातम्। पौराणिकव्रतानुष्ठानानि विशेषतः

[19] तदेव - 97/33

[20] तदेव - 93/73

[21] भागवते- 10/02/26

[22] भविष्यमहापुराणम् प्रतिसर्ग पर्व- 25/37

[23] तदेव - 26/22

[24] तदेव - 16/12

भविष्यपुराणेक्तानि व्रतानि विभिन्नेषु प्रदेशेषु मध्ये सामाजिक-आचारादीनां विस्ताराय यथोपयुक्तानि।

## ग्रन्थपञ्जी

1. अग्निपुराणम्, पञ्चानन तर्करत्न (सम्पादकः), नवभारत पावलिशार्स, कलकाता, 1419
2. पद्मपुराणम् (उत्तरखण्डम्), पञ्चानन तर्करत्न (सम्पादकः) नवभारत पावलिशार्स, कलकाता, 1410
3. भविष्यपुराणम् (1म-2य खण्डः), परमात्मानन्दनाथ भैरव (गिरि) (सम्पादकः), नवभारत पावलिशार्स, कलकाता, 1420
4. श्रीभविष्यमहापुराणम् (1म-2य-3य भाग), एस.एन.खण्डेलवाल (व्याख्याकारः), चौखम्वा संस्कृत प्रतिष्ठान, दिल्ली, 2017
5. आप्टे, वामन शिवराम, संस्कृत हिन्दी कोश, मोतीलाल वनारसीदास पाब्लिशार्स प्राइभेट लिमिटेड, दिल्ली, 1969
6. त्रिपाठी, श्रीकृष्णमणि, पुराणपर्यालोचनम् (भागद्वयम्), चौखम्वा सुरभारती प्रकाशन, वाराणसी, 2012
7. पण्डा, गङ्गाधर, संस्कृत वाङ्मय का वृहत् इतिहास, उत्तरप्रदेश संस्कृत संस्थान, लखनउ, 2006
8. वन्द्योपाध्याय, धीरेन्द्रनाथ, संस्कृत साहित्येर इतिहास, पश्चिमवङ्ग राज्यपुस्तक पर्षत्, कलकाता, 2009
9. वसु, नगेन्द्रनाथ (सम्पादकः), विश्वकोष, वागवाजार विश्वकोष प्रेस, कलिकाता, 1316
10. उपाध्याय, वलदेव, पुराण-विमर्श, चौखम्वा विद्याभवन, वाराणसी, 2018
11. वसाक, शीला, वांलार व्रतपार्वण, पुस्तक विपणी, कलकाता, 1998